श्री जगन्नाथाष्टकं

श्री जगन्नाथाष्टकं

कदाचित्काळिंदीतटविपिनसंगीतकवरो
मुदा गोपीनारीवदनकमलास्वादमधुपः |
रमाशंभुब्रह्माऽमरपतिगणेशाऽर्चितपदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 1 ||

भुजे सव्ये वेणुं शिरसि शिखिपिंछं कटितटे
दुकूलं नेत्रांते सहचरकटाक्षं (च) विदधत् |
सदा श्रीमद्वृंदावनवसतिलीलापरिचयो
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 2 ||

महांभोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादांतः सहजबलभद्रेण बलिना |
सुभद्रामध्यस्थः सकलसुरसेवावसरदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 3 ||

कृपापारावारः सजलजलदश्रेणिरुचिरो
रमावाणीसोमस्फुरदमलपद्मोद्भवमुखैः |
सुरेंद्रैराराध्यः श्रुतिगणशिखागीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 4 ||

रथारूढो गच्छन् पथि मिळितभूदेवपटलैः
स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः |
दयासिंधुर्बंधुः सकलजगतां सिंधुसुतया
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 5 ||

परब्रह्मापीडः कुवलयदळोत्फुल्लनयनो
निवासी नीलाद्रौ निहितचरणोऽनंतशिरसि |
रसानंदो राधासरसवपुरालिंगनसुखो
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 6 ||

न वै प्रार्थ्यं राज्यं न च कनकता भोगविभवे
न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् |
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 7 ||

हर त्वं संसारं द्रुततरमसारं सुरपते
हर त्वं पापानां विततिमपरां यादवपते |
अहो दीनानाथं निहितमचलं पातुमनिशं
जगन्नाथः स्वामी नयनपथगामी भवतु मे || 8 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री जगन्नाथाष्टकं संपूर्णम् |